No. ४६८३

Title वारवार्षुषिकस्य वार संख्या संस्कारविधिः

Author देवभद्रः बलभद्रसूनुः

Extent ४ पत्राणि Age सं० १८१६

Subject ज्योतिषम्

वार वार्धुषिकस्य वार संख्यासंस्कारविधिः

४६८३

२२२

श्री

१०

॥श्रीमद्यात्रिकदेवदत्तनिपोधिपत्र४॥

वार संस्कार संस्कार विरचे:

१ स्त तिातदग्निमस्याऽर्धंनस्यवामासस्य तेवमेकोनत्रिंशद्दिनानिभवंति। कचित्कालविशेषेण त्रयो
दशदिनात्मकः पक्षश्च भवति। तदानीं तस्यैवोत्तरान्यतरः पक्षस्तु प्रायेण षोडशदिनात्मको वा पं
चदशदिनात्मको भवत्येव। अतिस्तप्रतिमासं स्थूलदृशा त्रिंशद्दिनसंख्यां विदधाति षष्ठि
श्चैतस्याधिक्तसंख्याभ्यः। स्थूलदृशा वार्द्धुषिकैः करणे तु प्रायेण वर्षस्य षष्ठ्याधिक शतत्रयी दि
नसंख्यास्तु षट् दिनानि न्यूनानि जायंते इति तु शिष्टानुस्मरणं। वक्ष्यमाणकालविशेषे
णांतराधिमाससंपातात्। एवं चाऽनेकवर्षमासपक्षादिसमूहेन बहुकालविशेषेण प्रत्य
ब्दं षष्ठ्याधिकशतत्रयीदिनसंख्याव्यभिचरति। प्रथमाब्दे पुनः संख्याव्यभिचरत्येव। वार्द्धु
षिकंतु धनिकशिष्टाः अहोरात्रकालविशिष्टं प्रतिदिनगतमेवाऽऽद्रियंते। तत्तु वारतो वा रंया

१

श्रीगणेशाय नमः॥ नत्वा विनायकं देवं वारवार्द्धुषिकस्य तु॥ वारसंख्याविधाने नवारसंस्कार उ
च्यते॥१॥ चांद्रसावनसौरनाक्षत्रभेदेन मासाश्चतुर्विधाः॥ तत्र चांद्रमानेन षष्टिश्चत्रीणि च शता
त्रि ३ नि संवत्सरस्याहानी। शतपथे नवमस्य प्रथमे॥ तथा षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्या
होरात्राइति निरुक्तग्रंथे तुरीये। आभ्यां श्रुतिभ्यां षष्ट्यधिकशतत्रयी दिनसंख्या ३६० व
र्षस्य समाम्नाताः। द्वादश मासाः संवत्सरस्येति श्रुत्या माससंख्याः १२ समाम्नाताः। कचित्त्रयो
दश मासाः संवत्सरस्येति श्रुतिः साऽन्तराऽधिमासाभिप्रायेणेत्यविरोधः। द्वौ पक्षौ मासस्ये
ति पक्षावुक्तौ। त्रिंशतं मासस्याहानि। त्रिंशन्मासस्य रात्रय इत्यहोरात्रकालेन विशिष्टान्य गणे प्र०
हान्युक्तानि। तत्र कस्यचिन्मासस्य मासादितो रविवारादिवारगणनेन त्रिंशद्दिनानि भवं ॥१॥

१ स्त सि। तदग्निमस्याऽर्धंनस्यवामासस्यतेवमेकोनत्रिंशद्दिनानिभवंति। कचित्कालविशेषेण त्रयो
दशद्दिनात्मकः पक्षश्च भवति। तदानीं तस्यैवोत्तरान्यतरः पक्षस्तु प्रायेण षोडशद्दिनात्मको वा पं
चदशद्दिनात्मको भवत्येव। अतिस्फुटप्रतिमासं स्थूलदृशा त्रिंशद्दिनसंख्यां विदधाति षष्टि
श्चेत्याद्युक्तसंख्याभ्यः। स्थूलदृशा वार्द्धुषिकैः करणे तु प्रायेण वर्षस्य षष्ट्यधिकशतत्रयी दि
नसंख्यास्तु षड्दिनानि न्यूनानि जायंत इति तु शिष्टानुस्मरणं। वक्ष्यमाणकालविशेषे
णांतराधिमाससंपातात्। एवं चाऽनेकवर्षमासपक्षादिसमूहेन बहुकालविशेषेण प्रत्य
ब्दं षष्ट्यधिकशतत्रयीदिनसंख्याव्यभिचरति। प्रथमाद्देप्युक्तसंख्याव्यभिचरत्येव। वार्द्धु
षिकं तु धनिकशिष्टाग्रहो रात्रकालविशिष्टं प्रतिदिनगतमेवाऽऽदियंते। तत्तु वारतो वारंया

वड्गणनयैवाऽन्यूनानधिकमुपपद्यते नान्यथा। वाराणामनादिसिद्धेरविरोधाच्च। सूर्योदयो वा
रास्तु प्रसिद्धाः। अस्य धनिकास्तु प्रत्यब्दं षष्ट्यधिकशतत्रयदिनमध्ये षडूदिनानि न्यूनानि जा
यंत इति घोषणा। तेन चतुःपंचाशदधिकशतत्रयदिवसानां प्रत्यब्दं वार्धुषिकं भवतीत्याहुस्त
न्मंदं। तावत्संख्यवर्षस्याऽहोरात्रकालविशिष्टदिनभावस्याऽनियमात्। अत्र चोभयपक्षे
ष्वप्युक्तवद्दिनक्षये पि प्रतिमासं मासादितोऽष्टाविंशतिसंख्याका वारा भुज्यंत एव न तत्र सं
देहः। षष्टिश्चेत्यादिकृतिभिस्तु स्थूलदृष्ट्या प्रतिमासे त्रिंशद्वारभोगः प्राप्नोति। एवं च प्रतिमासं
दिनद्वयमवशिष्यते। ततश्चायमर्थः। प्राकृतसंवत्सरस्य प्रथममासस्य वार्धुषिकस्य प्रथम
दिनमारभ्येष्टसंवत्सरस्येष्टमासस्येष्टदिनं यावद्यावंतो मासास्ततोधिकदिवसाश्चतां सर्वां गणेश॰

॥२॥

न्नाणयेत्। अंतरागतोऽधिमासोनत्याज्यास्तमपिगणयेत्। गर्भेवार्द्धुषिकेभृत्येनाधिमासंविवर्ज्ज
येदितित्रिकांडमंडनोक्तेः। ततः प्रतिमासगतंवारगणनेनाष्टाविंशतिभ्योऽवशिष्टं स्थूलहृ
ष्टादिनद्वयंसंकलीकृतमासेभ्यउपरितनाधिकदिवसांश्चसंयोज्यदिनपरमसंख्यांकृत्वा
ऽनंतरंप्राकृतमासदिनगतप्राकृतसूर्यादिवाराणांमध्येयोवारस्तदादिवारसप्तकात्मकरू
पेणभाजकेनपरमसंकलीकृतदिनसंख्यासुभजेत्दिवसांश्याः। अत्रेदंरहस्यं। तथाहिदिव भा ५
साभाज्यायप्रतिमासमर्द्धदिनहासोभवतित्रिंशन्मध्ये। प्रत्यब्दंषष्ट्यधिकशतत्रयीदिनसंख्या
सुषड्दिनानिन्यूनानिजायंतइतिशिष्टानुस्मरणानुरोधात्। कालोधिक्यविशेषेणाऽधिमाससं
पाताच्च। एवंविभज्यलब्धिंमुत्सृजेत्तस्याःप्रयोजनाऽभावात्। अनंतरंभक्तेसतियावंतोदिवसा

अवशिष्टास्तेषां मध्ये प्राकृतवार्द्धुषिकदिनगतवारत्तोऽग्निमतद्द्वितीयदिनगतवारप्रभृतिवारगण
नेन वार्द्धुषिकसमाप्तिगतेष्टदिनगतवारगणनं यावद्गण्यमानेऽभीष्टदिनवारपर्यंतं यावंतो वारास्त ३२
एव वार्द्धुषिकवारदिवसास्तत ऊर्ध्वभाविनां शिष्टानां त्यागस्तावंतो दिवसा एव वारवार्द्धुषिक
स्यपरमसंकलीकृतदिनसंख्यास्तु न्यूना भवंतीत्यवधेयम्॥ अत्रोदाहरणं॥ यथा॥ एकादशाधि
६५ काऽष्टादशशतसंख्य १८११ तारणाभिधसंवत्सरस्य प्रथमा प्राकृती चैत्रशुक्लप्रतिपत्तिथिरस्यां प्रा
कृतो रविवारः॥ एतद्दिनमारभ्य त्रयः संवत्सराः षण्मासा नवदिवसा अंतवारगतोऽधिमासश्चाषो
डशदिनाऽधिकद्वात्रिंशन्मासेभ्य ऊर्ध्वमधिमासपातात्॥ उक्तं च वसिष्ठेन॥ द्वात्रिंशद्भिर्गतैर्मासैर्दि
ए३ नैः षोडशभिस्तथा॥ घटिकानां चतुष्केण पतत्यधिमासकः॥ इति॥ एवं च त्रिवत्सरा विंशन्मासा नवदि गणेश॰
वसाश्च भवंति॥ अत्र चतुर्द्दशाधिकाष्टादशशतसंख्य १८१४ सर्वजिन्नामसंवत्सरस्याश्विनशुक्ले
विजयादशमी वार्द्धुषिकसमाप्तिगतेष्टतिथिरस्यां मिष्टवारो मंदवारः॥ अत्रोक्तसंस्कारविधिना पंच ॥३॥

नवतिसंख्याका भाज्यदिवसाः९५ स्तेषु एकवत्सराभिवार्यैः द्वेशाधा भजेत् । लब्धाश्च शास्त्राज्यास्तेषां प्रयोजना
भावादित्युक्तं ॥ शिष्टाः पंचविंशतिदिवसाः २५ । तेषु एकं वत्सरं रवारप्रभृति शनिपर्यंतं गणनेन षट् भवंति
ग्रहलीयात द्वातां श्च वारवार्द्धुषिकदिवसेषु अवशिष्टा एकोनविंशतिदिवसाः १९ एतावंतो दिवसोनवादि
वसाधिक त्रिचत्वारिंशन्मासेषु न्यूनाः कार्याः ॥ शिष्टा द्विचत्वारिंशन्मासा विंशतिदिवसाश्च वारवार्द्धु
षिके सिद्धा भवंतीति ज्ञेयं ॥ ४२।२० ॥ द्वितीयमुदाहरणं । यथा । त्रयोदशाधिकाष्टांश शतसंख्य १८१३ व्यया ८५
ख्यसंवत्सरस्य पौषशुक्ले नवमी आर्द्रती तिथिरस्यां आर्द्रतो बुधवारः । एतद्दिनमारभ्यैकः संवत्सरः सप्तमासा
ग ४ स्त्रयो दिवसा अंतरा सर्वजित्संवत्सरमध्ये तु आश्विनो धिमासश्च । एवं च विंशतिमासास्त्रयो दिवसाश्च भवंति ॥
अत्र वर्त्तमान पंचदशाधिकाष्टादशशतसंख्य १८१५ सर्वधार्याख्य संवत्सरस्याऽघश्रावणशुक्ले द्वादशी
वार्द्धुषिकस्य समाप्तिगता तिथिरद्यवर्त्तमानवारः आर्द्रत एव बुधवार इति स्थितिः । अत्र पूर्ववत् संस्कारके
रणेनैकोनविंशतिमासाः पंचविंशतिदिवसाश्च सिद्धा जायंते ॥ अत्रेयमंकसंस्थितिः ॥ मासास्त्रिचत्वारिंश

त्।४३।दिवसाश्च नवो१९।अतिमासगतदिनद्वयस्य दिवसाः षडशीतिः ८६।दिवसानां संयोगः पंचनवतिः ९५।
अयं भाज्यः।भाजकाः सप्त ७।एभिर्द्दशधा भक्ते सप्तर्गताः ७०।अवशिष्टाः पंचविंशतिः २५।प्राकृतवाराद्द
श्निमवारतो गणिताः षट्८६।एभिन्यूना अवशिष्टा एकोनविंशतिः १९।ताश्च त्रिचत्वारिंशन्मासे पुनर्व
दिवसाधिके ४३।१९।नयेत्।शिष्टा द्विचत्वारिंशन्मासा विंशतिदिवसाश्च ४२।२०।एवमेव द्वितीयस्यां तत्र मा
साः २०।दिवसाः ३।अतिमासगतोर्वरितदिवसाः ४०।योगः ४३।अयं भाज्यः।भाजकाः सप्तैव ७।एभिः पंचधैव भ
क्ते पंचत्रिंशद्गताः ३५।उपरितना अष्टौ दिवसाः ८।एवं न्यूनाः कार्याः।शिष्टा एकोनविंशतिमासाः पंचविंशति
दिवसाश्च १९।२५।एवमेव सुधीभिरन्यत्राप्यूहनीयमित्यादिक्॥इति श्रीमन्नागरज्ञातीयमहायाज्ञिकपाठक
श्रीरामचंद्रसूनुगङ्गाधरपाठकवंशसंभूतपाठकश्रीवल्लभात्मजदेवभद्रेणोदाहृतो वारवार्दुषिकस्य
वारसंख्यासंस्कारविधिः॥शुभं भवतु॥ग्रंथसंख्या ७२॥संवत् १८१६ माघशुक्ल १५ शुक्रवासरे लिखितं गणेशरा०
क१ श्रीमद्याज्ञिकदेवचंद्रात्मजविजयचंद्रेण॥मातृकरुणाद्दत्तः श्रोतर विदक्षस्यार्थे॥गणेशजी सहाय॥श्री॥ ॥४॥
एतेन पुरश्चरणादावन्यत्रापि ज्योतिःशास्त्रसंमतोऽहर्गणो व्याख्यातः शुभं भवती ४ श्लोक ७०